Shakti Stotram Madakritam

मदकृतां शक्तिस्तोत्रम्

Document Information

Text title : Shakti Stotram Madakritam

File name : shaktistotrammadakRRitAM.itx

Category : devii, mudgalapurANa, devI, stotra

Location : doc_devii

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 44 | 2.44. 20-30||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

sanskritdocuments.org

मदकृतां शक्तिस्तोत्रम्

॥ श्रीगणेशाय नमः ॥
मद उवाच ।
नमामि त्वां महामाये सर्वशक्तिसमन्विताम् ।
त्वदाधारमिदं सर्वं शक्तियुक्तं प्रवर्तते ॥ २० ॥
अनादिमप्रमेयां त्वां न जानन्ति महर्षयः ।
वेदान्तवेद्यरूपां वै नमामि परमेश्वरीम् ॥ २१ ॥
नानाभेदकरीं देवीं नानाभेदविवर्जिताम् ।
भेदाभेदमयीं त्वाऽहं नमामि सकलेश्वरीम् ॥ २२ ॥
पार्वतीं दक्षपुत्रीं च हिमाचलसुतां तथा ।
समुद्रतनयां लक्ष्मीं सावित्रीं त्वां नमाम्यहम् ॥ २३ ॥
त्वां स्वाहां त्वां स्वधां चैव वषट्कारात्मिकां शिवाम् ।
बुद्धिरूपां देवमयीं ज्ञानरूपां नमाम्यहम् ॥ २४ ॥
सिद्धिदां सर्वकार्येषु सिद्धिरूपां तपस्विनीम् ।
योगिनीं योगदात्रीं वै योगेशीं त्वां नमाम्यहम् ॥ २५ ॥
त्वां स्तोतुं न समर्था ये मुनयो वेदवादिनः ।
देवाः स्कन्दश्च शेषश्च तत्राऽहं स्तौमि किं पराम् ॥ २६ ॥
धन्यौ मे पितरौ ज्ञानं तपो विद्यादिकं च यत् ।
यत्तवाङ्घ्रियुगं दृष्टं सर्वदुःखविमोचनम् ॥ २७ ॥
इत्युक्त्वा संस्थितस्तूष्णीं भावेन स मदासुरः ।
तमुवाच महाशक्तिर्भक्तिभावेन यन्त्रिता ॥ २८ ॥
(फलश्रुतिः)
शक्तिरुवाच ।
त्वया कृतमिदं स्तोत्रं मम प्रीतिविवर्धनम् ।
भविष्यति महाभाग सर्वकामफलप्रदम् ॥ २९ ॥
धर्मार्थकाममोक्षाणां साधनं प्रभविष्यति ।

पठतां शृण्वतां सर्वं सुखदं च महासुर ॥ ३०॥

इति मदकृतां शक्तिस्तोत्रं सम्पूर्णम् ॥

- ॥ मुद्गलपुराणं द्वितीयः खण्डः । अध्यायः ४४ । २.४४। २०-३०॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 44 . 2.44. 20-30..

Proofread by Yash Khasbage, Preeti Bhandare

Shakti Stotram Madakritam

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*